# दुष्टः बकः

एकस्मिन् कानने एकः सरोवरः आसीत् । तत्र बहवः मत्स्याः कर्कटकाः च आसन् । कश्चन बकः अपि तत्र वसति स्म । कालान्तरे सः मत्स्यान् ग्रहितुम् असनर्थः अभवन् । इदानीं कथमाहारं सम्पादनीयमिति चिन्तयन् सः एकम् उपायम् आयोजितवान् । सरोवरस्य तीरे स्थित्वा सः रोदनम् आरब्धवान् । तदा कश्चन कर्कटकः तस्य समीपम् आगत्य पृष्टवान् – 'भोः ! किमर्थं भवान् रोदनं करोति' इति ।

तदा बकः उक्तवान् – 'अद्य अहम् एकां दुर्वार्तां श्रुतवान् । द्वादशवर्षपर्यन्तम् अत्र अनावृष्टिः भविष्यति इति । अस्माकं सरोवरे किञ्चिदेव जलम् अस्ति । शीघ्रमेव तदापि शुष्कं भविष्यति । तदा मम बान्धवाः भवन्तः सर्वे अपि मृताः भविष्यन्ति किल इति मम दुःखम्' इति ।तत् श्रुत्वा कर्कटकः तां वार्ताम् अन्यजलचरान् उक्तवान् । ते सर्वे अपि भीताः भूत्वा बकस्य समीपम् आगतवन्तः । विनयेन ते पृष्टवन्तः - 'भोः, अस्माकं प्राणरक्षार्थं कमपि उपायं वदतु' इति ।

तदा बकः उक्तवान् – 'किञ्चिद्दूरे अन्यः कश्चन वापी अस्ति । तत्र प्रभूतं जलमस्ति । तत् सदापि शुष्कं न भविष्यति । यदि भवन्तः मम पृष्टं आरोहन्ति तर्हि अहं सर्वान् तत्र नयामि' इति । तदा ते जलचराः महता उत्साहेन तं परितः स्थितवन्तः । बकः तान् आरोप्य ततः प्रस्थितवान् । कञ्चित् दूरे एका शिला आसीत् । तत्र तान् स्थापयित्वा सः सन्तोषेण खादितवान् । एवमेव सः बहून् मत्स्यान् खादितवान् ।

एकस्मिन् दिने कर्कटकः उक्तवान् –'अद्य मां नयतु' इति । 'अस्तु अद्य कर्कटकस्य मांसं खादामि' इति चिन्तयित्वा बकः तं पृष्टे आरोपितवन् । शिलां प्रति गतवान् च । कर्कटकः दूरात् एव शिलायां अस्थीनि दृष्ट्वा बकस्य उपायं ज्ञातवान् । अतः सः स्वदन्तद्वयेन बकस्य कण्ठं दृढं गृहीतवान् । वेदनया रोदनं कुर्वन् सः वञ्चकः बकः मृतः ।

* * *